Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 6 | ISSN : 2582-0095

# रुचिः तथा सर्जनात्मकता

**लक्ष्मीनारायण जेना**
**शोधच्छात्रः (शिक्षाविभागः)**
**केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपतिः**

**Article Info**
Volume 3 Issue 6
Page Number: 24-29
Publication Issue :
November-December-2020

**Article History**
Accepted : 01 Nov 2020
Published : 07 Nov 2020

अथ "विद्ययाऽमृतमश्नुते" इति खलु ऋषिवाक् । पराऽपरेति संज्ञितेयं शिक्षा आन्विक्षिकी, त्रयीवार्त्ता, दण्डनीतिः इत्यादयोऽपि अन्यर्भाव्य विराजते। यद्यपि शिक्षेयं वेदेकेन्द्रिता तद्रक्षणपरम्परा तदाश्रिता च विकासं प्राप्नोति, तथापि भारते स्वातन्त्र्यं भजमानेयं शिक्षा ऋषिभिः नानासम्प्रदायाश्रितैः बहुपरिवर्द्धिता। शिक्षयेति ज्ञायते यया सा शिक्षा। "यावज्जीवं अधीयते विप्राः" शिक्षा आजीवनं प्रचलमाना एका चलन्ती प्रक्रिया भवति । बालके अन्तर्निहितरूपेण विद्यमानानां शक्तीनां बहिः प्रकाशनं शिक्षाप्रक्रियाद्वारा सम्पादयितुं शक्यते । वेदशास्त्रविज्ञानादीनां स्वाध्यायानुशीलनं तत्त्वार्थज्ञानं च विद्येति स्वीक्रियते। उपनिषदामनुसारेण द्वे विद्ये परा अपरा च। तत्र अपरा इत्युक्तेः वेदाः वेदाङ्गानि च। किञ्च परा इत्युक्ते यया तदक्षरम् अधिगम्यते। तद् यथा द्वे विद्ये वेदितव्ये.... पराचैवापरा च। तत्रापरा ऋग्वेदो, यजुर्वेदो, सामवेदः, अथर्ववेदः, शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्योतिषञ्चेति। अथ परा यया तदक्षरम् अधिगम्यते। (मण्डूकः. २.१.४.५)

---

सत्सु बह्विषु शिक्षाषु चयनम् अतीव प्रमुखं वर्तते। कां व्यक्तिं कस्मिन् विषयकाभिरुचिः? कस्य छात्रस्य कस्मिन् पाठ्यक्रमे अभिरुचिरित्यादि विषये जिज्ञासा इत्यादिनां समस्यानां समाधानाय निर्देशनप्रदानसमये अध्येतुः बुद्धेः विशेषमानसिकयोग्यतायाः रुचेः ज्ञानं अतीव महत्त्वपूर्णं भवति । तासां विशेषमानसिकयोगतानां रुचेः अवगमनाय शिक्षामनोविज्ञाने बहुबिधा मानसिकयोग्यतापरिक्षणादीनां (Test of Special Abilities) निर्माणं प्रतिदिनं जायते।

रुचेः तथा विशेषमानसिकयोग्यतादीनां परीक्षणात्प्राक् प्रथमतया अध्येतुः वयसः ज्ञानं भवेत्। अत्र एवं जिज्ञासा जायते यत् – एताः विशेषमानसिकदक्षताः बाल्यावस्थायां किमर्थं दृग्गोचरं नायान्ति इति विषये बहूनां मनोवैज्ञानिकानां परस्परमतभेदाः दृश्यन्ते। ड्यु महोदयानुसारम् – मनुष्याणां विशेषमानसिकयोग्यतायाः ज्ञानं ११ वर्षात् स्पष्टीभवति। तथैव

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

साइरिल् बर्ट् (Cyril Burt) महाशयः एवमभिप्रैति यत् – मनुष्याणां विशेषमानसिकयोग्यतायाः परिज्ञानं १३ वर्षवयसि भवति। ततः परं समस्या आगता यत् एतासां योग्यतानां गणना कष्टकरम्। एवमेव मतैक्यमपि न दृश्यन्ते। अतः 1938 वर्षे थर्सटन्महोदयः तस्य सहयोगीनाम् साहाय्येन सप्तमूल्ययोग्यतानां निरूपणं कृतम्। ते च – वाचिकतर्कपरीक्षणम् (Verbal reasoning), अंकसम्बन्धीपरीक्षणम् (Numerical ability), अमूर्ततर्कपरीक्षणम् (Abstract Reasoning), आन्तरिकसम्बन्धिपरीक्षणम् (Space Relation), यन्त्रवत्-तर्कपरीक्षणम् (Mechanical Reasoning), लेखसम्बन्धी-गति तथा यथार्थता सम्बन्धी परीक्षणम् (Clerical speed and Accuracy), भाषासम्बन्धी परीक्षणम् (Language Uses) । एतेन महोदयेन भागत्रये परीक्षणस्य विभागः कृतः । ते च - 5-7 वर्षवयस्कबालकाः (शाब्दिकम्, परिमाणिकयोग्यत, आन्तरिक्षिकयोग्यत, प्रत्यक्षज्ञानदिनां ज्ञानम्), 7-11 वर्षवयस्कबालकाः (शाब्दिकम्, संख्या, तर्क तथा प्रत्यक्षज्ञानम्, आन्तरीक्षिकयोग्यता, गति), 11-17 वर्षवयस्कबालकाः (शाब्दिकम्, संख्या, शब्दप्रवाह, आन्तरिक्षिकयोग्यता, तर्कशक्तिपरीक्षणादि)। तत्र केषाञ्चित् इह प्रस्तूयते –

- **आन्तरिक्षिकयोग्यता** (Spatial Ability) - अत्र व्यक्तेः आकारसम्बन्धीयोग्यतायाः ज्ञानं जायते । अस्य उदाहरणम् National Institute of Industrial Psychology, London द्वारा निर्मित N.I.I.P Form Relation Test भवति। अस्य अन्यदुदाहरणं भवति Minnesota Paper Form Board भवति। अत्र ६४ पदानि ज्यामितीयाकृतिरूपेण वर्त्तन्ते।
- **यान्त्रिकयोग्यता** (Mechanical Ability Test) - अत्र यान्त्रिकयोग्यतायाः परीक्षणं क्रियते । एतदर्थं कदाचित् Paper & pencil तथा कदाचित् यन्त्रादीनां साहाय्येन परीक्षणं क्रियते । अस्य उदाहरणं भवति Minnesota Mechanical Assembly Test । अस्मिन् परीक्षणे मञ्जूषात्रयं भवति, यत्र समान्ययान्त्रिकवस्तूनां निर्माणकार्यं करणीयम् । अतदतिरिच्य Binnet Test of Mechanical Comprehension तथा Mac-Quarrie Test for Mechanical Ability अपि प्रसिद्धम्।
- **गत्यात्मकयोगतापरीक्षणम्** (Motor Dexterity Test) - अस्मिन् अङ्गुल्या हस्तादीनां गत्यात्मकपरीक्षणम् क्रियते । अत्र उदाहरणम् - Bennett Hand Tool Dexterity Test, Perduc Peg Board Test, O'coner Tweezer Dexterity Test प्रधानम्।
- **स्थिरतायाः परीक्षणम्** (Steadiness Test) - अत्र हस्तस्य अङ्गुल्याः वा स्थिरतायाः परीक्षणं क्रियते। अत्र O'coner Tweezer Dexterity Test इत्यपि परीक्षणं भवति। अत्र संदंशमाध्यमेन (Pincer- चिमटा) माध्यमेन छिद्रेषु सूचिं (Pin) स्थापयन्ति
- **लिपिकपरीक्षणम्** (Clerical Tests) - एतेन परीक्षणेन आलेखसम्बन्धीदक्षतायाः (Clarical abilities) ज्ञानं जायते। अत्र च अंकगणीतसंबन्धीप्रश्नाः, शब्दानां ज्ञानम्, शुद्धतया पठनं लेखनमित्यादीनां परीक्षणम् भवति

। अस्य उदाहरणं भवति – Minnesota Clasical Test । अत्र भागद्वयं भवति – एकन्तु तावत् संख्यायाः विषये, अपरन्तु नामेषु (Name) |

- **कलात्मक तथा सौन्दर्यात्मकयोग्यता** (Artistic or Asthetic Ability Test) - अत्र व्यक्तेः कलात्मक अथवा सौन्दर्यात्मकयोग्यतायाः परीक्षणम् क्रियते ।अत्र उदाहरणम् – Mcadory Art Test, Seashore Measure of Musical Talent इत्यादयः ।

अत्र सम्प्रति एकस्य अभिवृत्तिपरिक्षणम् इत्यस्य वर्णनं क्रियते –

**अभिवृत्तिः ( ATTITUDE )**

अभिवृत्तिः किमपि कार्यं प्रति एका मानसिकप्रतिक्रिया वर्तते । कार्यस्य साफल्यार्थम् अभिवृत्तिः प्रथमसोपानमेव स्वीक्रियते । कार्यसम्पादनात्पूर्वं मध्ये वा यदि कस्मिंश्चित् सकारात्मकाभिवृत्तिः न दृश्यते तर्हि इप्सितपरिणामः न लभ्यते । अभिवृत्तौ व्यक्तेः चिन्तनविचारावधारणाचारादीनि कारणानि व्यक्तीत्वेन भवन्ति । कार्यसम्पादनेन यदि अनुकुलाभिवृत्तिः व्यक्तौ न दृश्यते तर्हि प्रतिकूलपरिणामः एव प्राप्यते । अभिवृत्तिः इत्यस्य बहुधा बहुभिः शिक्षाविद्भिः परिभाषाः प्रदीयन्ते । हिम्मलेफरेल् एवम् इग्ले महोदयौ उक्तवन्तौ सांवेगिकप्रत्यक्षीयसंज्ञानात्मकप्रक्रियायाः अभिप्रेरकस्थायिसंघटनमेव अभिवृत्तिः इति । उपर्युक्तपरिभाषाविश्लेषणेन वक्तुं शक्यते अभिवृत्तिः संज्ञानात्मिका प्रतिक्रियात्मकव्यवहारिकसमन्वितकारकोपरि निर्भरति । तत्र प्रतिक्रियात्मकोपादानम् अभिवृत्तेः केन्द्रं वर्तते । व्यवहारिकपक्षे अभिवृत्तेः मापनं परीक्षणं च विधीयते ।

आङ्ग्लभाषायां ‘ Attitude ’ इति शब्दः लैटिन् भाषायाः ‘ Aptos’ इति शब्दादागतः। यस्यार्थः fitness or adeptness इति भवति।संस्कृते अभिवृत्तिः इत्यस्मिन् पदे अभि इत्युपसर्गः, वृत्तिशब्दः वृत् – वर्तते इत्यस्मात् धातोः क्तिन् प्रत्यये कृते निष्पन्नः। वर्तते अनया इति व्युत्पत्तौ वृत्तिः इति पदं व्यवह्रियते। सामान्येन अयं शब्दः व्यापारविशेषं निर्दिशति। अयञ्च व्यापारः आन्तरिकः बाह्यश्चेति द्वेधा वर्तते। अभि इत्युपसर्गपूर्वकः अयं शब्दः विशिष्टमर्थं निर्दिशति। अभि उपसर्गस्य असंख्याकाः अर्थाः वर्तन्ते। तेषु उदयः, कामना, स्मृतिः इत्यादयोऽर्थाः आन्तरिकं व्यापारं निर्दिशन्ति। तस्मात् अत्रायम् अभिवृत्तिशब्दः वृत्तेः उदयम्, उत्पत्तिम्, अथवा परिणामप्रागवस्थां मानसिकीं स्थितिं सूचयति। अयमभिवृत्तिशब्दः Attitude इत्यस्य पर्यायत्वेन शिक्षाविद्भिः कल्पितः। एवञ्च अभिप्रायाः, अभिलाषाः, विचाराश्च सामान्यतया अनेन शब्देन सूचिताः भवन्ति। मनोविज्ञाने अयं शब्दः परिभाषितः –‘ Attitude is a complex behaviour having so many options in it representing the entire feeling about the situation ’.

संविदितमेवेदं शिक्षणक्षमता उत्तमोपलब्धिहेतुरित कौशलं न सर्वत्र अध्यापकेषु दृश्यते। केचन एव अध्यापकाः शिक्षणक्षमतया संयुक्ताः दृश्यन्ते। इतरेषु सा क्षमता नावलोक्यते। तर्हि स्यात् न्यूनमेव किञ्चित्कारणं येन शिक्षणक्षमतायाः अपचयः वा जायते इति। एवं परिशील्यमाने शिक्षकाणाम् अभिवृत्तिमेव तत्र कारणत्वेन निर्दिशन्ति शिक्षाविदः। अभिवृत्तिस्तु शिक्षणाधिगमप्रक्रियायाम् अनुकूलं प्रभावं जनयति। यदि कस्यचित् शिक्षकस्य स्वीयां वृत्तिं प्रति

अनुकूलाभिवृत्तिः न भवति तर्हि तदीयं शिक्षणमपि निष्प्रभावमेव स्यात्। एवञ्च यस्मिन् अध्यापके शिक्षणव्यवसायविषये अनुकूलाभिवृत्तिः दृश्यते सः एव अध्यापकः उत्तमम् अध्यापयितुं प्रभवति।

इत्थमभिवृत्तिः अत्यन्तं जटिलतत्त्वं भवति। अतः अभिवृत्तेः इदमित्थम् इति निरूपणमपि सरलाय न कल्पते। शिक्षाचार्याः बहुधा अभिवृत्तिं परिभाषितवन्ति। अभिवृत्तिर्नाम मनुष्यस्य प्रवृत्तीनां भावानाम् इष्टाभीष्टानां पूर्वधारणानां विचाराणां सन्तोषादिसंवेगानां किञ्चिद्वि-षयकधारणानाञ्च योगः भवति। अतः Thurston महोदयः मानवभावानां सामूहिकरूपमेव अभिवृत्तिरिति पर्यभाषत। परन्तु बहुधा अनुसन्धानं विधाय अभिप्रेरणात्मकं तत्त्वं च सावधानम् अनुसन्धाय सः एव Thurston महोदयः अभिवृत्तिं The affect for and against a Psychological object इति अवोचत्।

एतेन अभिवृत्तिः नाम मानसिकसन्नद्धता या च अनुभवेन सङ्घटिता निर्देशिता च भूत्वा गतिशीला सती व्यक्तेः प्रतिक्रियां प्रभावयति। तस्मात् अभिवृत्तिः एव कस्याञ्चित् परिस्थितौ जीवविशेषान् प्रतिक्रियां कर्तुमादिशति इति प्रेरयति इति वा स्पष्टम्। अपि च अभिवृत्तेः यावती गुणवत्ता भवति तावती च प्रतिक्रिया प्रबला भवति। एवञ्च अभिप्रेरकतत्त्वानां सांवेगिकानाम् इन्द्रियमानसप्रत्यक्षप्रक्रियाणाच्च गतिशीलं सङ्घटनमेव अभिवृत्तिः इति वक्तुं युक्तम्। इदञ्च गतिशीलं सङ्घटनं व्यक्तेः पारिस्थितिकं तन्त्रमाश्रित्य ज्ञायते। अत एव Krech महोदयेन अभिवृत्तेः गुणवत्ता निरूपि। Enduring organization of motivational. Emotional, perceptual and cognitive process with respect to some aspect of the individual’s world – इति विचारः प्राकाशि।

**अभिवृत्तेः स्वरूपम् (Structure of Attitude)**

प्रत्येकं व्यक्तौ बाह्यतथ्य – वस्तु – परिस्थिति – विचारादीन् प्रति काश्चन निश्चितधारणाः कानिचन निश्चितदृष्टिकोणानि च भवन्ति। ताश्च धारणाः तानि दृष्टिकोणान्येव वक्तेरभिवृत्तिरूपेण परिगण्यन्ते। एताः अभिवृत्तयः न कस्यापि जन्मतः अपि तु अनुभवेन, अभ्यासेन, संसूचनेन जीवने उद्भवन्ति विकासञ्च प्राप्नुवन्ति। यदा अनुभवेन, अभ्यासेन वा एकं निश्चितं दृष्टिकोणं, समाजं, सांसारकवस्तूनि च प्रति भवति तदैव एका निश्चितधारणा विकासं प्राप्नोति इति मनोविश्लेषकाणां मतम्। अतः एताः परिवर्तयितुं शक्याः।

**थर्स्टन्**महोदयानुसारम् – अभिवृत्तिः कमपि विशिष्टविषयं प्रति व्यक्तेः प्रवृत्तीनां पूर्वाग्रहाणां पूर्वनिर्धारितविचाराणाम् आतङ्कानां च योगाः सन्ति। तथा च व्यक्तिः यस्मिन् कस्मिन्नपि निश्चिते समाजे वसन् एकं निश्चितं मनोविकासं प्राप्नोत्येव। अतः जन्मानन्तरमेव एताः विकसिताः भवन्ति। अभिवृत्तिविषये विदुषां मतानि एवं सन्ति –

**अभिवृत्तीनां विशेषताः**

- जन्मजाताः न भवन्ति अभिवृत्तयः। काश्चनाभिवृत्तयः शारीरिकावश्यकताभिः उत्पन्नाः भवन्ति।
- अभिवृत्तयः संज्ञानात्मिकाः भवन्ति, तेषां वस्तूनां गुणान् ज्ञात्वा एव मानवः मनसि कामपि धारणां स्थापयति।

- अभिवृत्तीनां प्रकृतिः स्थायि, अस्थायिरूपेण च द्विधा भवति। उदाहरणार्थं – चीनादेशं प्रति भारतस्याभिवृत्तिः। पूर्वं धनात्मकाभिवृत्तिरासीत, परं युद्धानन्तरमभिवृत्तिः ऋणात्मिका सञ्जाता।
- पर्यावरणे बहवो उद्दीपकाः मानवं प्रभावयन्ति। विचाराणां भिन्नत्वात् एकस्मिन्नेव समये मानवस्य भिन्नाः अभिवृत्तयः भवन्ति।

**अभिवृत्तिं प्राभावयन्तः घटकाः (Factors influencing Attitudes)**

मानवे विभिन्नाभिवृत्तीनां विकासो जायते। पर्यावरणमाध्यमेन एव अभिवृत्तयः विकसिताः भवन्ति। अभिवृत्तेः विकसने केचन घटकाः कार्यं कुर्वन्ति ते –प्रत्यक्षज्ञानीयघटकः (Perceptual Factor ), प्रेरणात्मकघटकः ( Motivational Factor ), शाब्दिकघटकः (Verbal Factor ), सामाजिकघटकः ( Social Factor ), सांस्कृतिकघटकः ( Cultural Factor ), कार्यात्मकघटकः Functional Factor ), व्यावसायिकघटकः ( Vocational Factor ), लैङ्गिकघटकः ( Sexual Factor )

**अभिवृत्तिमापनम्( Attitude measurement )**

अभिवृत्तिमापनेनैव अभिवृत्तेरध्ययनं सम्भवति। अभिवृत्तीनां मापनं प्रत्यक्षाप्रत्यक्ष-विधिभिः भवति। अभिवृत्तिमापने पर्यावरणमपि सहायकघटकत्वेन स्वीक्रियते। परिस्थित्याधारेण एव अभिवृत्तयः निर्धारिताः परिवर्तिताश्च भवन्ति। अतः पर्यावरणीय-परिस्थितीनामध्ययने अपि अभिवृत्तिमापनं क्रियते। यतो हि, अभिवृत्तिः स्थिरा न भवति परं परिवर्तनशीला भवति।

अभिवृत्तिमापने विश्वसनीयतायाऽभिवृद्ध्ये अभिवृत्तीनां मापनमत्यावश्यकम्। प्रायः विश्वसनीयविधीनामभावेन अभिवृत्तिमापनं न भवति। अभिवृत्तिमापने काठिन्यमेकामनुभूयते यत्– अप्रत्यक्षरूपेण एव ज्ञायते मापनस्य प्रामाणिकता। यतो हि आधिक्येन अभिवृत्तिमापनानि अप्रत्यक्षरूपेण एव भवन्ति। अन्यदपि काठिन्यमस्ति यद् वैयक्तिकाभिवृत्तीनामध्ययनं न सम्भाव्यते। अभिवृत्तयः व्यक्तिगताः भवन्ति। एतदर्थं पृथग्रूपेण **मापनविधयः** अपेक्षिताः भवन्ति।

प्रत्यक्षरूपेण तु अभिवृत्तेः मापनं शरीरक्रियामापनेन ( Physiological measures) भवति। अप्रत्यक्षरूपेण तावत् मापन्या ( Scale ) उत निर्धारितविधि ( Rating method) माध्यमेन क्रियते।

- **शारीरिकक्रियामापनम्**( Physical Measures )

शारीरिकक्रियाणां मापनं सुकरं नास्ति। शारीरिकमापनेन केवलं परिमाणस्य मापनं कर्तुं शक्यते, परन्तु अभिवृत्तिः दिशा न। एकमेव प्रकारकं शारीरिकमापनं बहुधा स्वीयानुक्रियां परिदर्शयति यथा राष्ट्रियताभिवृत्तिः उत रुचिः। अभिवृत्तिपरिवर्तनमपि तात्कालिकी प्रक्रिया नास्ति, यत् परिवर्तनसमये झटिति मापनं सम्भवेत्। वस्तुतः परिवर्तनं मन्दगत्या जायते, अतः तस्य मापनं नातीव सुकरम्। सामान्यतया मानवीयव्यवहारान् दृष्ट्वा अभिवृत्तेरनुमानं क्रियते।

- **अभिवृत्तेर्मापनानि ( Attitude scales )**

मानक – कथनानामाधरेण स्वीयसम्मतिः असम्मतिर्वा शाब्दिकप्रतिक्रियायां दातव्यो भवति। तेषां प्रतिक्रियाणां योगः मानवस्याभिवृत्तेः द्योतको भवति। सर्वाभिवृत्तयः कस्यापि वस्तुनः पक्षे – विपक्षे वा मानवस्याभिप्रायेण अङ्केषु परिगतिरूपाः विधयः एव भवन्ति।

अभिवृत्तिमापनस्य प्रमुखानि मापनानि निम्ननिर्दिष्टानि सन्ति।

१. थर्स्टन् विधिः ( Thurston's Method)

२. लिकर्टविधिः ( Likert's Method )

३. गटमैनविधिः( Gutman's Method )

इत्थं पूर्वोक्तप्रकारेण रुचिः सर्जनात्मकता इत्येतयोर्विषये यथामति यथाशास्त्रं संक्षेपेण वर्णितम् ।

**परिशीलितग्रन्थसूचिः**

1. शिक्षामनोविज्ञानम्
2. मनोवैज्ञानिक परीक्षण
3. मनोवैज्ञानिक अभिरुचि परीक्षण
4. शिक्षण अभिरुचि परीक्षण
5. Cognitive Behavioral Treatment of Borderline Personality Disorder
6. The Neuroscience of Creativity